5

CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 522

(a) Gotrinātha vrata

Title (b) Gopūjana vidhi

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 522 Subject: Pauranic Rit

Title: (a) Gotrirātra vrata (b) Gopūjana vidhi

Author: — Scribe:

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9.8" by 4.5" Extent: 14 foll.

Language: Sanskrit Script: Devanāgari

Remarks: —

॥श्रीगणेशाय नमः॥ अथ भाद्रशुक्लत्रयोदश्यां गोत्रिरात्रव्रतं हेमाद्रौ भ
विष्योत्तरे युधिष्ठिरोवाच भगवत्वत्प्रसादेन बहूनि सुकृतानि च श्रुतानि
बहुपुण्यानि कृतानि मधुसूदन. सर्वपापहराणि स्युः सर्वकामप्रदा
यिनी सांप्रतं श्रोतुमिच्छामि व्रतानामुत्तमं व्रतं किंचिद्योगव्रतं ब्रूहि यदि
तुष्टोसि माधव यत्कृत्वा सर्वपापेभ्यो नरनार्यश्च मुच्यते श्रीकृष्ण उवाच
कथयामि नृपश्रेष्ठ व्रतानामुत्तमं व्रतं यन्न कस्यचिदाख्यातं तच्छृणुष्व नृ
पोत्तम यां यां कामान्वांछंति लभंते तां तां तथैव च न कृष्णादेव मुच्यंते नर ना
र्यश्च सर्वशः प्रभोर्भगवतो राजन्कामधेनोः प्रसादतः सौभाग्यं संततिं
श्रीं प्राप्नोति सुखमुत्तमं मासि भाद्रपदे शुक्ले त्रयोदश्यां समारभेत् त्र

योदश्यां प्रभाते तु समुत्थाय शुचिर्भवेत् गोष्ठे वा गोपथे वापि कृत्वा भूमि
गृहं शुभं अष्टहस्तं चतुर्हस्तं चतुर्हस्तं सुशोभनं मंडपं कारयेत्तत्र क
दलीस्तंभसंयुतं शुक्लपक्षे त्रयोदश्यां मासि भाद्रपदे तथा हृषीकेशस्य स
मीपे तु व्रतमेतत्समारभेत् प्रातः स्नात्वा त्रयोदश्यां दंतधावन पूर्वकं त्रि
रात्रनीयमं कुर्याद्विधिविद्दिनि स्वभावतः आचम्य प्राणानायम्य शुक्लां
बरेत्यादि प्रयो० अद्याद्य मम समस्तपाप दुरित क्षय पूर्वक
रद्वारा इह जन्मनि जन्मांतरे पुत्रपौत्रादि सुख श्री प्राप्त्यर्थं अ
वैधव्यं च मोक्षफलप्राप्त्यर्थं श्रीगौरीलक्ष्मीनारायणप्रीत्यर्थं गोत्रिरा
त्रव्रतमहं करिष्ये तदंगं भूमिपूजनपूर्वकं पंचगव्यकरणं दिग्बंध

नंकलशाराधनं गणपतिपूजनं ब्रह्माचार्यादिऋत्विजांवरणं वर
णंपुण्याहंच स्वस्तिवाचनं मंडलाधिष्ठातृदेवतानां कलशाधिष्ठा
तृदेवतानांस्थापनप्रतिष्ठापूजनमहंकरिष्ये तथाचश्रीलक्ष्मीना
रायणायपीठपूजनपूर्वकं ध्यानआवाहनादियथामिलितोपचारैः
आवर्णैस्सहपुरुषसूक्तेनषोडशोभिरुपचारैःपूजनमहंकरिष्ये
आसनादिवरणपर्यंतंकृत्वा अथगोत्रिरात्रव्रतनियमग्र
हणं गोविंदजगतांनाथगोवर्द्धनधृ गोत्रिरात्रंकरिष्यामि
शरणंमेभवाच्युतं १ समुपोष्यगोत्रिरात्रंभक्त्याऋचावृतं
तव भोक्ष्यंहन्तिचतुर्थेह्नीसौभाग्यंदेहिगोममं २ अथविशेषः

अथगोत्रिरात्रनियममंत्रः भाद्रेमासेसितेपक्षेद्वादश्यादिचतुर्दिनं करिष्येहंव्रतंचर्ये
णपूजनंतेविधानतः १ निराहारोभविष्यामित्रिदिनंचतवाग्रतः निर्विघ्नेनसमा
प्येतांवत्ससादात्सुधेनुके २ निमंत्रितासिदेवित्वं पूजार्थेमेदिनत्रयं व्रतंसंपूर्ण
तांयातुधेनुकेवत्समातृतः ३ संपूजितामयागावोमेदिशंतुबहुसंपदः सर्वपापहरा
गावःसर्वकामफलप्रदाः ४ गावोरक्षंतुमेतुष्यंगावोरक्षंतुमेयशः गावोरक्षंतुमे
[illegible]स्वं स्वर्गकामधेनोनमस्तुते ५ भगवन्देवदेवेशपरमात्मन्जगत्पते त्रिरात्रमे
तदेवेहोमेतवपादांबुजाग्रये ६ निवेदितोजगन्नाथसोपवासोपरायणः ब्रह्मचर्ये
भुशयानांबुजंपरिवर्जनं ७ असत्यंनिष्ठुरत्वंचसर्वभूतानुकंपनं करिष्येदेवदेवे
शप्रसादाद्भवमाधव शरणंमे जगन्नाथअविघ्नंकुरुकेशव ८ दिनत्रयेव्यतिक्र
मेपरिपूर्णव्रतंतव करिष्येपारणंविप्रैर्व्रतंमेसफलमस्त्विति ९ गोव्रतमहमाचरिष्ये

ब्रह्मजज्ञानमितिमंडलदेवतानांस्थापनं मध्येकलशस्थापनं अ
ग्न्युत्तारणं प्रतिष्ठा प्राणप्रतिष्ठांचकृत्वा सहस्रशीर्षेतिसूक्तदेहेर
न्यासेविनियोगः इत्यादिंकृत्वा यथादेहेतथादेवेन्यासंकुर्याद्य
थाविधिः पीठपूजांकृत्वा सहस्रशीर्षेतिषोडशर्च० इत्यनेनविनियोगः
यत्पुरुषं० ते अंगुष्ठाभ्यांनमः ब्राह्मणोस्य० त तर्जनीभ्यांनमः चंद्र
मामनसो० त मध्यमाभ्यांनमः नाभ्याआसि० यत्र अनामिकाभ्यां०
सप्तास्या० त्रि कनिष्ठिकाभ्यांनमः यज्ञेनयज्ञ० वाः करतलकरपृष्ठाभ्यां
नमः एवंहृदयादिषट् मत्स्यायनमः मूर्ध्नि कूर्मायनमः पादयोः
वाराहायनमः जंघयोः नृसिंहायनमः ललाटे वामनायनमः

मुखे परशुरामाय० हृदि रामायनमः बाह्वोः कृष्णायनमः नाभ्यां बु
द्धायनमः गुह्ये कल्किने० जानुनि केशवायनमः शिरसि नारा
यणायनमः मुखे माधवायनमः ग्रीवायां गोविंदायनमः बाह्वोः
विष्णवेनमः हृदये मधुसूदनायनमः पृष्ठे त्रिविक्रमायनमः कट्यां
वामनायनमः जठरे श्रीधराय० गुह्ये हृषीकेशायनमः जंघयोः
पद्मनाभायनमः गुल्फयोः दामोदरायनमः पादयोः इतिन्यासः
अथध्यानं विद्यारविंदसुकरांबुजकुंभपद्मकोदकीदरसुदर्शनसं
भिहस्तं सौदामिनीसुदिरकांतिविभातिलक्ष्मीनारायणात्मकमखं
डितमात्ममूर्तेः १ गोपीगोपसमाकीर्णेकलादहसमन्वितः रुक्मिण्या

द्विभिशक्तिभिरावाद्यसकलाश्रमां   लक्ष्मीनारायणायनमः
ध्यानंसमर्पयामि आवाहनादिमुद्राप्रदर्श्य सहस्रशीर्षा०लं आ
गच्छदेवदेवेशतेजोराशिजगत्पते क्रियमाणांमयापूजांगृहाणसु
रसत्तमश्रीलक्ष्मीनारायणाय० लक्ष्मीनारायणंआवाहयामिल
क्ष्मीनारायणंस्थापयामि तस्यदक्षिणेभूरुक्मिण्यै० रुक्मिणीं०
तत्रैव ॐभूर्भुवःस्वः मित्रविंदायैनमः मित्रविंदांआ०मि
उत्तरे ॐभू० शैब्यायैनमः शैब्यां०मि तत्रैव ॐभू० जांबुवत्यै०
जांबुवतीं०मि पूर्वे ॐनंदायनमः नंदं० पश्चिमे ॐबलभद्राय०
बलभद्रं०मि तत्रैव ॐभू० यशोधादायैनमः यशोदांआ०मि

पूर्वे सुरभ्यैनमः सुरभिं०मि दक्षिणे सुनंदायै० सुनंदांआ०मि
पश्चिमे सुभद्रायै० सुभद्रां०मि उत्तरे कामधेनवे० कामधेनुं०मि
तदस्तमित्रा०य रुक्मिण्याद्यावाहितदेवताभ्यः स्थापिताःसु०सुः
स्तमत्रचंदनपुष्पादिसंपूज्य पुरुषएवे०ति नानारत्नसमायुक्तं
कार्तस्वरविभूषितं आसनंदेवदेवेशप्रीत्यर्थंप्रतिगृह्यतां आ
सनंस० एतावानस्य०वि गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतं
तोयमेतत्सुखस्पर्शंपाद्यार्थंप्रतिगृह्यतां पाद्यंस० त्रिपादूर्ध्व०मि
नमस्तेदेवदेवेशनमस्तेधरणीधरनमस्तेकमलाकांतगृहाणार्घ्यं
नमोस्तुते अर्घ्यंस० तस्माद्विरा०रः कर्पूरवासितंतोयंमंदाकि

न्यासमाहृता आचम्यतां जगन्नाथ मयादत्तं हि भक्तितः अर्घ्यो
नेआचमनं स० पंचामृतस्नानं पयोदधिघृतं चैव मधुशर्करया
न्वितं पंचामृतेन स्नपनं प्रीयतां परमेश्वर पंचामृतस्नानं स० यत्पु
रुषेण० वि गंगा च यमुना चैव नर्मदा च सरस्वती तापी पयोष्णि रे
वा च ताभ्यः स्नानार्थमाहृतं कृष्णा च गोतमी वेणी क्षिप्रा सिंधुस्त
थैव च तोयमेतत्सुखस्पर्शं स्नानार्थं प्रतिगृह्यतां शुद्धोदकस्नानं
तस्माद्विरा०रः कर्पूरवासितं तोयं मंदाकिन्यासमाहृता आचम्य
तां जगन्नाथ मयादत्तं हि भक्तितः आचमनं स० तं यज्ञं बर्हिषि प्रौ
क्षं०ये सर्वक्षाधिके रम्ये लोकलज्जानिवारके मयोपपादिते उ

भ्यं वाससी प्रतिगृह्यतां वस्त्रं स० तस्माद्विरा०रः कर्पूरवासितं तो
यं मंदाकिन्यासमाहृता आचम्यतां जगन्नाथ मयादत्तं हि भक्तितः
आचमनं तस्माद्य०संभृतं०ये दामोदर नमस्तेस्तु त्राहि मां भवसा
गरात् ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम यज्ञोपवीतं तस्मा
द्वि०रः कर्पूरवा०तः ४ मलयाचलसंभूतं गंधसारं मनोहरं हृद
यानंदनं चारु प्रीत्यर्थं प्रतिगृह्यतां चंदनं स० तस्माद्य०तैः अ
क्षतान्धवलान्शुभ्रान्कर्पूरागरुमिश्रितान् मयानिवेदिता भक्त्या
गृहाण जगदीश्वर अक्षतान् स० तस्मादश्वा०वयः जपाकरंजक
सुपरक्तोत्पलमनुत्तमं पुष्पाणि गृह्यतां देव सर्वकामप्रदो भव

उष्णाणि अथांगपूजा श्रीकृष्णायनमः पादौपूजयामि हृ
रये॰ जानुनी पू॰ बलभद्राय॰ उदरं पू॰ मुकुंदाय॰ कटिं पू॰
चक्रिणे॰ भुजौ पू॰ श्रीकंठधारिणे॰ कंठं पू॰ पद्ममुखाय॰
मुखं पू॰ गोविंदायनमः शिरः पू॰ श्रीलक्ष्मीनारायणायनमः स
र्वांगं पू॰ अभिषूसि॰नं अथावर्णपूजा लक्ष्मीनारायणाय॰
रुक्मिण्यैन॰ मित्रविंदायै॰ शैब्यायै॰ जांबुवत्यै॰ नंदायै॰ बल
भद्राय॰ यशोदायै॰ सुरभ्यै॰ सुनंदायै॰ सुभद्रायै॰ धेनवे॰ काम
अभिषू॰१ ईश्वर्यै॰ कमलायै॰ लक्ष्म्यै॰ चंचलायै॰ भूत्यै॰ रमा
यै॰ हरिप्रियायै॰ पद्मायै॰ पद्मालयायै॰ संपदे॰ उच्चायै॰ प

चक्राय॰ अभिषू॰ समस्तावरणार्चनं ५ अद्विरिय॰तः येतचूर्णं
रध्यावस्त्रोमं॰ना॰ गुलालं र॰ यक्षुरुषं॰नं वनस्पतिनां सर्वेषां रसंगं
धसमन्वितः वस्त्रमं सर्वदेवानां धूपोयं प्रतिगृह्यतां धूपं॰ ब्राह्मणो
स्य मुखमासी॰न ज्योतिरूपमरूपं वा चरंति मुनिपुंगवाः ज्योतिर्भ
र्ध्येस्थितां देवगृहाणां च सुदीपकं दिपं॰ चंद्रमामन॰त अन्नं चतुर्विधं
स्वादुरसैः षड्भिः समन्वितं भक्ष्यभोज्य समायुक्तं नैवेद्यं प्रतिगृह्यतां।
स॰ नैवेद्यं॰ आचमनं ।पूगीफलं महद्दिव्यं नागवल्ली दलैर्युतं। कर्पूरे
णसमायुक्तं तांबूलं प्रतिगृह्यतां। नागवल्लीपत्रस॰ यापजि॰ हिरण्यगर्भ॰

पद्मारिण्यैनमः अभिषु० २ केशवायनमः नारायणाय० माध
वाय० गोविंदाय० विष्णवेनमः मधुसूदनाय० त्रिविक्रमाय०
वामनाय० श्रीधराय० हृषीकेशाय० पद्मनाभाय० दामोदराय०
शंकर्षणाय० वसुदेवाय० प्रद्युम्नाय० अनिरुद्धाय० पुरुषोत्तमा
य० अधोक्षजाय० नृसिंहाय० अच्युताय० उपेंद्राय० हरये० श्री
कृष्णायनमः अभिषसि० ३ इंद्रायनमः अग्नये० यमाय० वाय
वेनमः नैरृतये० वरुणाय० वायवे० सोमायनमः ईशानायः
ब्रह्मणे० विष्णवे० १० अभिषसि० ४ वज्रायनमः शक्तये० दंडाय०
खड्गाय० पाशाय० अंकुशाय० गदायै० त्रिशूलाय० पद्माय०

वंनमोस्तुते। नमः सर्वहितार्थाय जगदाधारहेतवे। साष्टांगोयंप्रणामोस्तु
प्रणयेनमयाकृतः। यज्ञेयज्ञे०स्तुतिपाठः॥ भूःपादौयस्यखंचोदरमसुरश्च
निलश्चंद्रसूर्यौचनेत्रेकर्णावाशाशिरोद्यौर्मुखमपिदहनोयस्यवास्तो
मताब्धिः। अंतस्थंयस्यविश्वंसुरनरखगगोभोगिगंधर्वयक्षै
श्चित्रंरंरम्यतेजस्त्रिभुवनवपुषंविष्णुमाद्यंनतोस्मि १ अंसितनिशि
तधारंयस्यचक्रंकराग्रेमणिकनकविचित्रेकुंडलेयस्यकर्णे। अम
रगणसमस्तैःसेव्यतेयस्यमाध्वा असुरकुलनिहंताप्रीयतांवासुदे

अथ फलार्घदानं नारिकेरार्घदानेन प्रीणांये कृं हरिं तथा। प्रथमे बीजपूरा
ख्यं द्वितीये दाडिमं स्मृतं तृतीये नारिकेलं च दद्यादर्घ्यं दिनत्रयं। मंत्रः गदा
माधार गोविंद रुक्मिणी वक्षस्थः प्रभो। गोपगोपी समोपेतं अर्घ्यं गृह्ण
नमोस्तु ते। इत्यर्घः लक्ष्मीकांत जगन्नाथ गोत्रिरात्रव्रतं मम परिपूर्णं कु
रुष्वेदं गृहाणार्घ्यं नमोस्तु ते। रूपं देहि जयं देहि सौभाग्यं देहि गौर्मम॥
वंशपात्रार्घदानेन सर्वकामफलप्रद॥ आरार्तिकं प्रदक्षिणा। पापोहं॰
नमस्ते पुंडरीकाक्षं नमस्ते हरिप्रियः। नमस्ते कमलाकांत वासुदे

व॥ इति पुष्पांजली॥ अनया पूजया श्रीगौरीसहलक्ष्मीनारायणाय यथावा
हितदेवताभ्यः प्रीयंतां। अथ नियमसुक्तमंत्रः॥ दिनत्रये व्यतिक्रांते
परिपूर्णं व्रतं तव वरिष्ठे पारणं मम व्रतं संपूर्णतां करु॥ इति नियमसु
क्तमंत्रः॥ यथाशक्त्या॰ इति समापनं। इति स्कंदपुराणे तथा च भवि
ष्योत्तरपुराणे श्रीकृष्णयुधिष्ठिर संवादे गोत्रिरात्रव्रतपूजाविधिः स
माप्तः॥ ॥ ॥ ॥ अथ गो
पूजनविधिः॥ स्नानविधिना स्नानं स्वगृहे कलशस्थापनां हि ल
क्ष्मीनारायण पूजनं विधाय॥ ततो पूजोपहारान् गृहीत्वा सविबं

धुनिशाश्रोयैः सह गोशालायां सवत्साया गोः सन्निधौ गच्छेत् आचम्य प्राणा
नायम्य गंधाक्षतोदकं च गृहीत्वा नियममंत्रं पठेत् ॥ अद्येह देवदेवेशि
कारेथे व्रतमुत्तमं । गोत्रिरात्रमिति ख्यातं दुःखदारिद्र्यनाशनं ॥ १ ॥ करि
ष्ये नात्र विधिना निर्विघ्नेन समाप्यतां ॥ त्रिरात्रपोषणं स्याहं रक्षणं त्वं सु
रेश्वरी २ ॥ गंधाक्षतोदकं गोसन्निधौ निक्षिपेत् । ततो गौर्यादि देव
देवतान्नमस्कृत्य । गुरुं वैकं तत्र कृत्वा हिरण्यकापवित्वा गृहीत्वा देः
मम अशेषपापक्षयपूर्वकं गोत्रिरात्रव्रतार्थ श्रीपरमेश्वरप्रीत्यर्थं । सवत्सा
गोपूजनमहं करिष्ये । इति संकल्प्य । [illegible] तत्र मंत्रः

ती कृत्वा गौर्यै विद्महे देवपादाय धीमहि । तन्नो गौरी प्रचोदयात् । यथा
यथा देहे तथा देवे न्यासं कुर्याद्यथाविधि ततो गौरी निमंत्रण [illegible] मंत्रः ॥ वि
ष्णुवक्षसि या लक्ष्मी या लक्ष्मी धनदस्य च । या लक्ष्मी लोकपालानां सा धे
२ नुर्वरदास्तु मे । मा वियोगास्तु मे पुत्रैर्भर्त्रा च सह बांधवैः त्वत्प्रसादेन
न किं मे निश्चलास्तु निरंतरं न मे दुःखं च शोकं च न मे वैधव्यजं भयं ।
त्वत्प्रसादान्मे गौरी न मे भूयात्कदाचन । गयाम याः पूजिता गौरी गोत्रि
रात्रव्रतेषु वै । सर्वसंपूर्णतां यातु कृतं न्यूनाधिकं मया ॥ इति निमंत्र
मंत्रः सवत्साधेनोः परि गंधाक्षतपुष्पाणि समर्प्य नैवेद्यानि दत्वा प्रण

मेत॥ ततः षोडशोपचारपूजा। मंत्री ह्रग शृं गायै विद्महे वेदपारायै धीम
ही। तन्नो गौरी प्रचोदयात्। आवाहयामि देवि शिवां कानुग्रहकरिणी
। पूजां गृहाण मे देवि कामधेनुकुलोद्भवे सर्वमार्यै नमः आवाहयामि॥
नानारत्नसमोपेतं हेमयुक्तं सुशोभनं। आसनं कल्पितं तेन गृहाण सुरनी
विनो॥ गौर्यै० आसनं॥ ताम्रपात्रे स्थितं तोयं गंधपुष्पैर्युतं पाद्यं गृहा
ण देवेशि जगत्पुष्पाद्दानं दहायिनी। गौर्यै० पाद्यं। स्वर्णादि धातुनिमा
यी गंध तोयसमन्वितं फलपुष्पसमोपेतं अर्घ्यं गृह्ण सु[illegible]ये। गौर्यै० अ
र्घं गंगाजलमिदं दिव्यं सुवर्णकलशे स्थितं। आचमनीयं कुरुष्व नंदिनि शैलजो

कनं तत्प्रतिगृह्यतां। गौर्यै० आचमनं०। [illegible]जायकर्ष्णै० [illegible]नं॥ पयोदधि
घृतं चैव मधुशर्करयान्वितं। [illegible]रूतेन अपनकारयाम्यनिशं [illegible]प्रिये।
श्रीगौ० पंचामृतस्नानं। गंगा च यमुना चैव नर्मदायां सरस्वतयोः। स्ना
नार्थं तं मया नीतं गृहाण वरदायिने। सर्वमंगो० शुद्धो०। सर्वभूषाधि
के रम्ये लोकलज्जानिवारके॥ मयोपपादिते तुभ्यं सर्ववस्त्रा प्रतिगृह्य
तां। स० गौ० वस्त्रं। सौवर्णं रत्नखचितं मुक्ताहार सुशोभनं। अजे
कारमयानीतं गृहाण यदुवेष्टने। स० गौ० अलंकारं०। श्रीखंडचं

नंदिवं केसरागरुसं । ं कुंकुमेण समायुक्तं गृहाण जगदीश्वरी। स०
गौ०न्धं०। अक्षतां धवलाञ्छुभ्रान् कर्पूरागरुमिश्रितान्। मयानिवेदि
तं भक्त्या गृहाण सुरपूजिते। स०गौ० अक्षतं०। माल्यादीनि सुगंधानि मालत्या
दीनि वै प्रभो। मया हृतानि पुष्पाणि पूजार्थं प्रतिगृह्यतां। पुष्पं।
सुकुटं स्वर्णचित्तं चतुष्पमाला विराजितं। गृहाण कामधेनो त्वं व्रत
संपूर्णहितदे। स०गौ० मुकुटं। ततो गंधाक्षतपुष्पाणि गृहीत्वा। अथा
वर्णपूजा।। ॐ नंदिन्यै० कामधेन्वै० सुरभ्यै० सुतनंजायै० सुमन

सायै० शिरसि ब्रह्मणे० पार्श्वे पृथिव्यै० हृदि स्कंदाय० ललाटे रुद्रा०
कर्णयोर्दिग्भ्यो० कर्णमूले अश्विनीकुमाराभ्यां० कर्णयोर्मध्ये वे
देभ्यो० नेत्रयोः शशिभास्कराभ्यां० दंतेषु मरुद्भ्यो० जिह्वायां सरस्व
त्यै० कंठणयोमेरुमहिहि हिशय० शृंगाग्रे चूडादी सप्तलोकेभ्यो० अ
पाने तीर्थेभ्यो० पुच्छे नक्षत्रेभ्यो० पयस्वे जाह्नव्यै० रोमकूपे ऋषिभ्यो० पृ
ष्ठे पन्नगेभ्यो० दक्षिणकुक्षौ धनदाय० वामकुक्षौ वरुणाय०
खुरमध्ये गंधर्वाय० खुराग्रे पन्नगाय० खुराणां पश्चिमभागे अप्स

रङ्गेभ्यो॰ गोमये ज लक्ष्म्यै॰ कुंशाग्रे प्रजापतये॰ चतुर्स्तने क्षीर समुद्राय॰
दुग्धे विष्णवे नमः॥ दक्षिहार्जे घायां॰ उर्वश्यै॰ वामर्जे घायां मेनका
यै॰ अन्यहर्गेषु सर्वेभ्यो देवेभ्यो॰ अस्ति ष्टसिद्धि मे॰ ततो वस्त्रपूजनं
मुखे नारायणाय॰ स्कंधयो र्वैरोचनाय॰ मूर्ध्नि शिवाय॰ नेत्रयोः शशि
ना स्कराभ्यां॰ नासिकयो र्वायवे॰ कंठे नीलकंठाय॰ बाह्वे शंकराय॰
बाहुमध्ये ब्रह्मणे॰ हृदये योगेश्वराय॰ कट्यां यज्ञस्वरूपाय॰ पु
छे त्रिविक्रमाय॰ गुदे हरिहराय॰ सर्वांगे शिवाय॰ अस्तिष्ट॰ स॰ गौ॰

वनस्पतिरसो॰ धूपं॰ साज्यं च वर्त्ति॰ दीपं॥ सुरभी वैष्णवी माता नित्यं
विष्णुपदे स्थिता। प्रतिगृह्णातु नैवेद्यं कामधेनु कुलोद्भवे॥ स॰ नै
वेद्यं। नागवल्ली दलं॰ याफलि॰ हिरण्यग॰॥ ॥ ततो विशे
षार्घदानं। तत्र मंत्रः॥ रूपं देहि यशो देहि वित्तं पुत्रां श्च देहि मे। अ
र्घं गृहाण मे देवी प्रसीद जगदंबिके॥ गोत्रिरात्र व्रतार्थाय यत्फलं च
मया कृतं। सर्वकामप्रदा देवी गृहाणार्घं नमोस्तुते। २। ततो वंशपात्रा
र्घदानं॥ अष्टसौभाग्यसंयुक्तं फलपुष्प समन्वितं॥ गृहाण वंशपा

आणि पुत्रसौभाग्यदायिने। धं शा० र्घ्यं० आरातिकं। पंचवर्त्तिपंचदीपैश्च
दीपिता सुरवंदिते। नीराजयामि हे देवि सर्वपापप्रणाशिनी। नीरा॰
प्रदक्षिणा॰ कृताश्चैनाणावस्त्रैश्चैवाक्यमातरः। सकृत्प्रदक्षिणेनैव नैवेदि
न्यातत्स मं नवेद्य। संतापितास्मि देवेशी कामकोधादिभिः। सहाप्रीते
नानेन सततं कामधेनु नमोस्तु ते। प्रदक्षिणा॥ गावो मे माग्रतः संतु
गावो मे संतु पृष्ठतः। गावो मे हृदये संतु गवां मध्ये वसाम्यहं। पंचगा
व सम्मुत्पन्ना मथ्यमाने महोदधौ। तासीन ध्यान्नुया नंदा न स्मै धेन्वेन

मो नमः। तीरक्षीरोसमुद्भूते यज्ञार्थं व्रतहेतवे। पूजार्थं सर्वदेवानी नमस्का
रं प्रसीदमे। नमस्कारं। अथ प्रार्थना। राग्यानि हुंतु इत्यादि। पूजा
याफलमाप्नोति यावद्द्विजान पूजयेत्। पूजितो सीति विरचिता
तावत्पूजाफलं लभेत्। अर्घ्यं गोपुच्छतर्पणं। ब्राह्मणभोजनसं॰
ततो आचार्यपूजा॥ विसर्जनमंत्रः॥ यन्मया पूजिता देवी गोत्रि
रात्रमयाकृतं। सर्वं संपूर्णतां यातु न्यूनाधिक मया कृतं। इति वि
सर्जनमंत्रः॥ यस्य स्मृत्या च ना॰ अरण्ये षु प्रवा गोष्ठे मातुर्गेच्छतु

मत्वमे। देहि वितं च पुत्रं च सौभाग्यं हे देहि मे सदा विसर्ज० गोपूज
नसंमाप्तः॥ ॥ श्रीरस्तु॥ कल्याणमस्तु॥ श्री॥